No. ४२४३

Title शास्त्रदीपिका एकादशाध्याय:

Author पार्थसारथि मिश्र:

Extent २६ पत्र Age सं. १८६४

Subject मीमांसा

शास्त्रदीपिकैकादशाध्यायः

[illegible]

११

शास्त्रदीपिकायांएकादशोध्यायः पत्रे २१

श्रा० ॥श्रीगोपीजनवल्लभायनमः॥ ॥प्रयोजनाभिसंबंधात्पृथक्तनां ननः स्यादेककर्म्यमेकशास्त्राभिसंयोगात्॥ दशमे ध्याये बाधा
१ भ्युच्चयविंतयाविकृतिष्वंगपरिमाणं चिंतितं॥ अतिदेशविचारश्चसप्तमादिभिर्द्वादशपर्यंतैः समाप्तः॥ संप्रत्युपदेशातिदेश
साधारण्येन प्रयोगपरिमाणं परिमाणप्रसंगादेकादशेतंत्रावापचिंतयाचिंत्यते। उपदिष्टातिदिष्टपदार्थेयत्तावधारणाधी
नंच प्रयोगेयत्तावधारणमिति न उत्तरकालमारंभः। नहि हैकप्रयोगवचनचोदितानामेकफलानां संहत्यकारिणां बहूनां कर्म्म
णां साधारणांगभाजामंगानुष्ठानं किंतंत्रेण भवत्युतावृत्त्येति चिंतात्लक्षणार्थः। प्रथमं तावदुपोद्घातं चैन संहत्यकारित्वं प्रति
पाद्यते। यदि ह्याग्नेयादयः षडपि परस्परानपेक्षाः स्वर्गं साधयेयुः ततस्तेषां कामिनः कर्त्तव्यत्वेन युगपदुपस्थानाभावात्पृ
थक्पृथगेव स्वांगयुक्ताः कर्त्तव्या इति न तंत्रत्वं सिद्ध्येत्। तस्मात्संहत्यकारित्वं प्रतिपाद्यते। तदयमत्राधिकरणे विचारः।
किमाग्नेयादीनि पृथक्पृथक्स्वर्गं साधयंति उत संहत्येति। तत्र। परस्परानपेक्षाणामुत्पन्नानां फलार्थिनां चोदमा
नं फलं तेषामेकैकस्यावधार्यते। तेषां खुदृश्यमानत्वात्साहित्यं न विवक्षितं। तस्मात्प्रत्येकमेव स्यादिति प्राप्ते अभिधीयते। १

आग्नेयादिकमुद्दिश्य फलं यत्तु परिश्यते। ननउद्दिश्यमानत्वात्तेषामेकैकस्य फलं। कामिनं तु यदोद्दिश्य कर्म्मणां वोदनानन्तरा
।तेषां विधीयमानानां सहभावो विवक्षितः। यद्यपि चोभयथा वचनव्यक्तिः संभवति नयापि हि द्व्यावगनं दर्शशब्देन त्रिकस्य पूर्ण
मासशब्देन च त्रिकस्य नंत्राभिधानावगमनं च साहित्यं माबाधीति कामिनमेवोपायार्थिनं नरमुद्दिश्य आग्नेयादीनि विधीयन्ते इ
त्येन द्वैव युक्तं। प्रधानत्वाच्च फलस्यैवोद्देशो युक्तो न कर्म्मणां गुणभूतानां। एकस्मिन्नपि फले संहत्यकारित्वेन विनियुक्तानां क
र्म्मणां प्रत्येकमप्युत्पन्नानां फलापेक्षा निवर्त्तत इति ना नपेक्षितसंबंधापत्तिः तस्मात्फलोद्देशेन विधीयमानानां विवक्षितं सा
हित्यमिति सिद्धं संहत्यकारित्वं॥ यत्तु भाष्यकारेण पुरुषपरत्वं कालपरत्वं निमित्तपरत्वं च निराकृत्य फलपरत्वं कामपदस्य
मपदस्य समर्थितं तदिहास्त्विति नमपि स्त्विति न विचारस्योपयोगो हानवे ना। सन्निहितस्य फलपरत्वे किं प्रत्येकं फलं उत संहत्येति
विचारो नान्यथेति। स्वर्गकामाधिकरणे तु स्वर्गस्य न त्वकामनायाश्चांगत्वेन विधानं निराकृतमित्यपुनरुक्तता॥ अंगानां तु प्र
हृभेदाक्रतुवन्नूत्सात्फलाभ्यवं। अतः प्रभृतित्रिभिः सूत्रैरेकमधिकरणं। एकेनापि समाप्येनेत्यतः प्रभृति च तुभिः सूत्रैरधिकरण
४

शा· त्तरंभाष्यकारेणव्याख्यातमितिप्रतिभातितत्रचपूर्वाधिकरणेऽङ्गानांकार्यभेदंपूर्वपक्षीकृत्यैकैकार्थत्वंसिद्धान्तितंउत्तरा
२ धिकरणेतुतस्मिन्नेककार्येविकल्पमाशंक्यसमुच्चयःप्रतिपाद्यतइतिव्याचष्टे।तदिदंवार्त्तिककारोनानुमेने।नहिकार्यभेदाभे
दमात्रंविनाप्रयोजनवतीभेदेसतिकार्याणांकारकत्वंदंगानांसमुच्चयःकार्यैक्येप्यपर्यायविधानात्समुच्चयइतिनास्त्य
नुष्ठानेविशेषः।अपोद्धातिकमिदंसतिहिकार्यैक्ये [illegible] विकल्पसमुच्चयचिन्तेतिचेत्।तथापितास्येवप्रयोजनंकरणैक
त्वाद्विनस्सामर्थ्याद्बोधनरूपस्योपकारस्यस्पष्टमेवैकत्वंस्वांनरकार्यभेदस्तसिद्धान्तेपिसंमतएवेतितन्चिन्तनीयंपक्षा
मः।अथशक्त्युद्बोधनस्यावांतरकार्याणांचमध्येकिंचिदुपकाराख्यंवस्तुमन्यतेतन्नदृप्रमाणकेनिःप्रयोजनंचस्तुद्बोधनए
वविकल्पसमुच्चयचिन्तोपपत्तेः।तस्मादेकमेवेदंपंचदशसूत्रंसमुच्चयप्रतिपादनार्थमधिकरणं।तत्रयश्चेहपक्षाःकिमंगाना
मितरेतरनिरपेक्षाणांकरूपकारकतयाविकल्पउतैकेनद्वाभ्यांबहुभिश्चोपकारसिद्धिरूपकारभूयस्त्वयावफलभूयस्त्व
उतसमुच्चितानामेवोपकारकत्वमिति।तदर्थमिदंविचार्यते।किमंगानांस्वात्मीयैर्विधिभिःप्रयोगोविधीयतेकिंवा २

प्रधानविधिभिरिति। तत्र प्रधानान्यपि सर्वेकेन शब्देन तन्त्रेणाभिहितानि युगपत्फले विनियुक्तानि युक्तं यत्फले समुच्ची-
यन्ते। अङ्गानि तु पृथक्शब्दाभिहितानि पृथगेव विहितानि फलमपेक्षमाणान्यन्योन्यनिरपेक्षाण्येव क्रत्वुपकार-
उद्धेत रार्थतया विनियुक्तानि विकल्पितुमर्हन्ति तेषां हि स्ववाक्यैरेव विधानं अस्ति विधानं गत्वानुपपत्तेः उक्तं हि। न चावि-
हितमङ्गं भवतीति। स्ववाक्यानि च तेषामेकैकमेव विदधतीति कुतः समुच्चयः न हि कश्चिद्धेतोऽस्ति येनैषां सहितानामनुष्ठा-
नमुच्यते। तस्मात् यथा सस्यपि पशुफलत्वे चित्रो द्भिदाहीनां पृथग्विधानात् समुच्चयः तथाङ्गानामपीति प्रथमः पक्षः
।सत्वं। निरपेक्षाणामुपकारकत्वं गम्यते तथापि वद्ङ्गाम्नानसामर्थ्याद्विकल्पस्यवान्याप्य चानेषामेकमपि प्रयुञ्जीत त-
थाहृदयहृ निचत्र्यंगभूयस्तयावोपकार भूयस्त्वात्फलभूयस्त्वमिति द्वितीयः। सर्वेकेनापि समाप्येते सकेन तन्त्रेणो-
च्यते। पक्षान्तरमेवत्वाधिकरणान्तरमिव भाष्ये दर्शितं। अधिकरणान्तरत्वे त्वनेनैव सूत्रेण विकल्पपक्षो वक्तव्यः स्या-
त्। न चानेन विकल्प उच्यते। मा भूत् प्रयोजनतरावस्थादिति संभवत् समुच्चयस्याप्यभ्यनुज्ञानात्। तस्मान्नाधिकरणान्त

शा॰ रं। सिद्धांतस्तु। युक्तं विज्ञानाधारीनां नैरपेक्ष्यं नेषु हि प्रतिवाक्यं भेदेन कामपदं श्रूयते। समिदादिषु तु यद्यपि प्रतिवाक्यं विधिश्रवणा
२ त्फलापेक्षोपजायते फलं तु न प्रतिवाक्यं श्रूयते। प्रधानभावनयात्वेषां फलाकांक्षिणां कथं भावापेक्षित्यासहेत्वं भावेन संबं
3 धः। सा च सरूउपात्तासर्वैरंगैरग्रस्नमाणा विशेषैर्विशिष्टैर्युगपत्प्रधानविधिना विधीयत इति सिद्धः समुच्चयः। यद्यपि व
प्रत्येकं विधिः श्रूयते न तथाप्यं शत्रयात्ता भारसा बुद्धास्त। भाव्यांशास्तु विध्यवगमवल्लादेव पुरुषार्थरूपापेक्ष्यते। एतावानेव
तत्र विधेरूपयोगः। तद्भावे धात्वर्थ एव भाव्यांशे निपतेत्। स संाव फलापेक्षायां प्रकृतभावनया युगपत्संबंधात्स्यात्स्व
सर्वांग विशिष्टाया युगपत्प्रधानविधिना विधानादंगानामपि तन्न एवानुष्ठानसिद्धेस्तस्मिन्नंशेंग विधीनामनुवादकत्वं।
सर्वविशिष्ट विधानाच्च समुच्चयः॥२॥ कर्मा एवारंभभाव्यत्वात्फलविवक्षसारंभं फलानि स्युः। काम्यानां कर्मणामैंद्राग्न
सौर्यादीनां किं सकृदेव प्रयोग उत भूयो भूयः फलमिच्छता भूयोपि प्रयोग इति संदेहे सकृदिति क्रमः। कर्मणा हि फलं का
लांतरे जनयितव्यं तद्द्वारमपेक्ष्यते। तत्रासंनिहितं तन्मंतं दृष्टमपूर्वं तस्य च कर्मजस्य तत्फलहेतुत्वं स्थायित्वं चेत्सने कक २

ल्मनाहृदं कृतयागादात्मनः फलमिति कल्पितं। आत्मनो हि सद्भावः स्थिरत्वं कर्म्मसंबंधश्च क्रमः केवलं तु फलहेतुत्वं क
ल्पनीयं। अतः कृतयागादात्मनः फलं। सकृत्प्रयोगादेव चासौ कृतयागो जातः पुनरपि प्रयुंजानस्य तावस्थैव कृतयागता
न तस्याः कश्चिदतिशय इति अनर्थकः पुनःप्रयोगः सकृदेव प्रयोग इति प्राप्ते ब्रूमः। आत्मन्यतिशयः कश्चित्कृते कर्म्मणि
नैव चेत्। प्रागवस्थासमानत्वादात्मनो न भवेत्फलं। आत्मस्वरूपहेतुत्वे स्वकर्तुरपि तद्भवेत्। तस्मादतिशयः कश्चित्कर्म्मभ्यो
जायते नरे। स च कश्चि कार्यविरोधित्वात्स्वाफलाभेर्विनश्यति। फलानरार्थं कर्त्तव्यं तस्मादतिशयान्तरं। स एवातिशयोस्माभिर
पूर्वमिति गीयते। तस्माद्भूयः प्रयोक्तव्यं भूयः फलमभीप्सता। कर्म्मभ्यः फलसिद्धिप्रकारे विकल्पसमुच्चयरूपे विंतिते बहुप्रकारे
सि प्रकारः सकृदसकृद्रूपः चिंत्यत इति संगतिः॥ ३॥ क्रियाणामर्थशेषत्वात् प्रेकतन्निर्हत्याऽपवर्गः स्यात्॥ ॥दर्शपू
र्णमासयोः श्रुतं। व्रीहीनवहंतीति। तत्र संशयः किं सकृदेवावघमननिपतनेन कृतोपरं तथंउत यावत्तंडुलनिष्पत्ति प्रयो
क्तव्यमिति। तत्रो घमननिपतनमात्रस्य शास्त्रार्थत्वात्तन्मात्रं विधीयते। विहितस्य च प्रयोजनकल्पनमिसंपिदृष्टवशानमा सत्त्व

शा. त्रमदृष्टार्थकर्त्तव्यंसर्वौषधावहंतिवत्। स्यादेवं यद्यवघातं कुर्यादिति विधीयते। अवघातेन तु समीहितं कुर्यादिति विधिः। स
४ मीहितं वदृष्टे संभवति नादृष्टं कल्पयितव्यं। संभवति चेहकचपेषितंतंडुलनिर्वृत्त्यर्थतावघातस्येति नदेवप्रयोजनं। त
त्रानभ्यस्ते नाशक्यमिति प्रयोजनवशादश्रुतोप्यभ्यासः कर्त्तव्यः। सर्वौषधावघाते तु दृष्टासंभवाददृष्टार्थशास्त्रार्थमात्रं
कर्त्तव्यं। ससकृदसकृद्विचारप्रसंगात्संगतिः। एवमुत्तरत्रापि॥ ॥अनुवृत्त्यानुमानेनाभ्यासे फलभूमा स्यात्॥ फलभूमा
र्थिना कर्माणि पुनः पुनः प्रयोक्तव्यानीति स्थिते चिंत्यते। किमेकस्मिन्प्रयोगेंगानि पुनः पुनः प्रयुंजानस्य फलभूयस्त्वं भ
वति नेति। तत्राभ्यस्यमानान्यंगानि बहूनुपकारान्जनयंति। बहूपकारयुक्तं च प्रधानं फलभूयस्त्वाय भवतीति मन्वा
नस्योत्तरं। समग्रकारणावृत्त्या हि कार्यमावर्त्तते। प्रधानं च सांगं फलसामग्री नांगमात्रं। अतस्तन्मात्रावृत्त्या न भूयः फलला
भः। न चोपकारभूयस्त्वया फलभूयस्त्वं। प्रमाणाभावात्। न चात्रांगाभ्यासः शास्त्रीयः। न चाशास्त्रीयेण प्रयासगौरवेण
फलभूमा शक्यो नेकल्पयितुं। अतः फलभूमार्थिना सांगं प्रधानमभ्यसितव्यं नांगमात्रं नापि प्रधानमात्रं॥ ॥बहुवचनेन ४

सर्वप्राप्तेर्विकल्पः स्यात्। वसंतायकपिंजलानालभनइत्यादिषु बहुवचनेनेषु किं त्रयाणामेवालंभः उनत्रिप्रभृति
नानासंख्यानामिति संदेहे। बहुवचनस्य सर्वत्र वृत्तेः सर्वसंख्यानां शास्त्रार्थत्वं शास्त्रीयत्वाच्च प्रयासगौरवास्वास्फलभूयस्त्व
मविवादमतोपाबहुस्याहे नानासंख्योपादानं नैनदेवं। बहुत्वमात्रं हि प्रकृतार्थः। ननु षड्देयाहादशदेयेत्यादिवन्नसंख्यावि
शेषाग्रणां भेदेन शास्त्रमस्ति। यद्युक्तास्फलभूयस्त्वकल्पेन योहि त्रीनालभते यश्च सहस्रं तपोरुभयोरपि बहुत्वसंपादनम
विशिष्टं। यत्तु विशिष्यते सहस्रादि तदशास्त्रीयं। नचाशास्त्रीयं गौरवं फलभूयस्त्वकल्पमितुमर्हं। एवं च त्रीनालभ्य च
तुर्णामालंभासंभवादव श्यं त्रय एवालभ्याः। तावता वसिद्धे शास्त्रार्थे नाधिकालंभं तावच्छास्त्रं कल्पयति। निवृत्तव्या
पारे च विधौ न हिंस्यादिति निषेधशास्त्रं प्रवर्त्तत इत्यधिकानालंभः। उत्तरासु यावत्स्वमपूर्वतात्। सान्नाय्य दोहाधिका
रेश्रूयते। वाग्यतस्तिस्रोदोहयित्वा विसृष्टवागनन्वारभ्य नूत्तमीमुत्तरादोहयतीति। तत्र किमुत्तरासां तिसृणामेव दोहउत
यावत्सो यजमानस्य गावस्तासां सर्वासामिति संदेहे। पूर्ववत्तिसृणामेव। नव यावत्त्वं दोहनं सान्नाय्येन चिन्नविहितं। येन सर्वा

द०
५
सांद्दोहनं स्यात्तयेन चोत्तरादोहयनीत्यनुवादः स्यात्। अनो विधिरेवायमिति सत्यामेव दोहः। मैवं। नास्यै नां रात्रिं कुमारा अपि
पिपयो लभेरन्निस्यनेन वचनेन कृत्स्नस्य पयसो हविष्ट्ववनात्प्राप्तमेव सर्वसांदोहनं। नहीदं कुमाराणां पयःप्रदानप्रति
षेधपरं। अदृष्टार्थत्वप्रसंगात् अपिशब्दानर्थक्याच्च। तस्मात्सर्वसांदोहः। प्रधानकर्म्मत्वादंगानां तत्कर्म्मभेदः प्रयोगे स्यात्।
उपांशुयाजप्रसक्तानुप्रसक्तादिगतं द्रष्टानीतलक्षणार्थं तं त्वावापं विचारयामः। दर्शपूर्णमासयोः षट्प्रधानकर्म्माणि त्रीणि पौ
र्णमास्यां त्रीण्यमावास्यायां कर्त्तव्यानि। तत्र देशकालकर्त्तॄणां तन्त्रत्वं वक्ष्यते। तेनैव कस्मामेव पौर्णमास्यां एकस्मिन्नेव देशे तेनै
कर्त्रा भिन्नान्येव प्रयाग्नेयादीनि तदंगानि च कर्त्तव्यानीति स्थिते चिंत्यते। किं त्रयाणामपि प्रधानानां भेदेन प्रयाजाद्यंगानि क
र्त्तव्यानि उत सकृदेवेति। तत्राभेदेन विनियुक्तत्वात् भेदेनैव क्रिया भवेत्। कथं भावस्य भिन्नत्वाद्भेदेन विनियोगधीः। पृ
का उप्याग्नेयादिभावनाः साध्यसाधनांशयुक्ता उत्पत्तिप्रयोगवाक्याभ्यामवगताः परस्परानपेक्षा एव कथमिति तेऽध्यं भावभेदेन
वापेक्षंते नतदृष्टा वसचिधिसमाम्नानात्पंगानि प्रसेकमेव मेव तासु विनियुज्यंते। विनियोगानुसारेणैवानुष्ठानं। तस्मादेकैकं ५

सांगयुक्तं कर्त्तव्यमिति सेकं सांगं कृत्वान्यपरमपि तथैव कर्त्तव्यमिति नियमो विधीयते। तस्य प्रत्येकमंगानां विनियोगलक्षणया पितु
।विधानवदनुष्ठानं सकृदेवोपकारकं। यथैव हि षट्सु भावनासु अंशत्रयविशिष्टासु विधित्सितासु साध्यसाधनांशप्रतिपादनेन
प्रकृतासु तृतीयमंशं कथंभावं भेदेनैवापेक्षमाणास्वपि सकृदाम्नाता एवांगविधयः सुषममपि प्रत्येकमंगानि समर्थ
यंति। तस्य पि वक्तव्य चित्प्रधानोत्पत्तिविधिसन्निधौ प्रकरणवशेन संनिधिर्वाध्यते। तथैव संहतानां प्रधानानां फल
साधनत्वात् कर्तृदेशकालैक्याच्च युगपत्सर्वेष्वनुष्ठातुं प्रकृतेषु प्रारब्धेषु सकृत्कृतमेवांगस्वरूपविशेषयाहृतं चासंनचासंनमक्रि
पिकेन विसंनिधिं वाधित्वानुष्ठानक्रियाप्रारंभात्वप्रकरणवशेन सर्वार्थं भवतीति न पुनः क्रियायां प्रयोजनमस्ति। किंचापौ
र्णमास्यां पौर्णमास्यां पौर्णमास्यां यजेतेति युगपदनुष्ठानं त्रयाणामवगतं दृष्टवत्पृथक् सांगेष्वनुष्ठीयमानेषु वाध्येता
तस्माद्दिककर्तृदेशकालकर्तृकाणां तंत्रांगानीति सिद्धं। आरम्भानंतुल्यकालानां योगपद्यमंगसमानतंत्रविशेषाणां॥ ॥आग्नेयं कृत्स्न
मग्नीवमात्रभेन सोम्यं बभ्रुं आग्नेयं कृत्स्नमग्नीवमिति निर्दिष्टं ननु आग्नेययोरनुष्ठानं तंत्रं दृष्टमगिनिसंशये। तंत्रमिति त्र्यमः। भवतिहि

शा॰ तन्त्रेणानुष्ठानं देवतैक्यात्। न च पाठक्रमात्क्रमेणानुष्ठानं॥ अवश्यंभाविनि क्रमे पाठान्नियमः। संभवन्ति चेह सकृद वत्सान
६ नुष्ठानमिति न क्रमापेक्षा। तस्मात्तन्त्रं। नैवं। यद्यप्याग्नेयपयोस्तन्त्रं नासंभाव्येत तथापि सौर्यैष्ट्येन तावदवश्यंभावी क्रमः। त
तत्र पाठवशादेकस्याप्येकस्य सौम्यास्तत्पूर्वमनुष्ठानं इतरस्य ततः पश्चात्। सहानुष्ठाने वश्यंभाव्यन्यतरेतरस्य सौम्ये नयः
6 क्रमः स बाध्येत। तस्मात्पृथगेवानुष्ठानं॥ ९॥ ॥इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायामेकादशस्य
प्रथमः पादः॥ ॥एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात्॥ ॥दर्शपूर्णमासयोर्देशः समे दर्शपूर्णमा
साभ्यां यजेतेति कालः पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति कर्त्तरि दर्शपूर्णमासयो
श्चतारश्च त्विज इति किमेते देशकालकर्त्तारस्तन्त्रमुत भेदेनेति। किं यस्मिन्नेव समये येष्वेव कृ॥ त्विग्भिर्यस्यामेव पौर्णमास्यामा ये:
ग्नेयः तस्मिन्नेव समये तस्यामेव पौर्णमास्यां तैरेवर्त्विग्भिरग्नीषोमीय उत समयान्तरे पौर्णमास्यन्तरे कर्त्रन्तरैरिति॥ तद
र्थमिदं विचार्यते। किमुत सन्निवाक्यैर्यदाग्नेयोऽष्टाकपालादिभिर्देशादिविधीनां संबंधः। उत फलवाक्येन दर्शपूर्णमासा ६

ष्यां स्वर्गकामो यजेतेति। तत्र। कर्म्मरूपेण संबंधो दर्शादीनां फलस्य च। उत्पत्तिविधिनैवातः सर्व्वेषामेकवाक्यता। त्रयाणा
मपि अंशानां भावसैनयैव संबंधो न परस्परं। अतो दर्शादिविधीनां फलवाक्यस्य च न मिथः संबंधः किंतु फलवाक्यं दर्शादि
वाक्यानि च सर्वाणि भावनोत्पत्तिवाक्येन संबध्यंते। उत्पत्तिवाक्येषु नाग्नेयादयो न्योन्यनिरपेक्षा एवावगता इति तथाभूतैः
संबध्यमानादर्शादयो निरपेक्षा एवमेव भवंति। निरपेक्षाः सन्ना अपि दर्शादिविधिषु पौर्णमास्यादिशब्दैस्तंत्रेणा
काः सहैवावगता इति साहित्येनैव फलसंबंधवद्दर्शादिसंबंधः कस्मान्न भवतीति चेत्। न॥ विषम उपन्यासः फलं प्रति
गुणभूतानां युक्तानंत्राभिधानावगतसाहित्यविवक्षा दर्शादीस्तु प्रतिकर्म्मणां प्राधान्याद्विवक्षितं साहित्यं। तस्मात् यथा
यदृच्छया पशुना सोमेन वा यजेत सोमावास्यायां पौर्णमास्यां वेस्मिन्वाक्ये तंत्राभिहिताभिरपीष्टिभिः प्रत्येकमेव कालः
संबध्यत इति। नैकस्यामेव पौर्णमास्यां सर्वाः क्रियंते तेन चाग्नेयादिभिः प्रत्येकमेव कालादीनां संबंधादेकस्यां पौर्णमास्या
माग्नेयं कृत्वा अपरस्यामग्नीषोमीयमित्येवं षट्सु पर्वसु षड्यागाः कर्त्तव्याः। न चैवं फलवाक्यावगतसाहित्यबाधः। न त्वेताव

श्रा· दवगतमेकमेव फलं सर्वैः साध्यते तेन प्रत्येकं फलस्य पृथक्त्वमिति न तस्य कालभेदाद्बाधः यथा पूर्णमासी त्रिकेऽमावा-
८ स्यात्रिके च द्वयोः पर्वणोर्निष्कृष्य मात्रेपि न फलं प्रति साहित्यं बाध्यते न यावज्जन्ममपि निष्कर्षेद्दृष्टव्यं। यदा वैवमुत्पत्तिवाक्यशेष-
7 त्वे कालादीनां न शेषत्वेन वाक्यप्रधानमात्राणां निरंगानां विधानात्तन्मात्राणामेवामी कालादयो नांगप्रधानदेशकालकर्तृत्वं।
तानि तु काम्यकालान्तरादिष्वपि कर्तव्यानीति प्राप्तेऽभिधीयते॥ ॥ भावनोत्पत्तिवेलायां देशादिविधयो यदि। तत एवं भवेत्तेन
तु फलवद्भावनाश्रयाः। यद्यपि भावनयैवांशानां संबंधो न परस्परं तथापि नोत्पत्तिवेलायामंगसंबंधः साहि प्रथमं भा-
व्यमपेक्षते तल्लाभश्च फलवाक्येनेति न फलवाक्यावरुद्धानामुत्पत्तिवाक्यानामंगसंबंधः। फलवाक्येषु फलं प्रति विवक्षि-
तं साहित्यं नांगविनियोगात् फलार्थिनां युगपत्सर्वेषु कर्तव्यतावगतिः। यस्यां हि बुद्धावाग्नेयः कर्तव्यतयोपतिष्ठते तस्या-
मेवाग्नीषोमीयादयोपि। प्रयोगविध्येकवाक्यत्वात्। तेन सर्वेषु कर्तव्यतयोपस्थितेषु चिकीर्षितेषु च पौर्णमासीकालो ८
विहितस्तत्र ये वैकाः पौर्णमास्युपात्तास्ते वाग्नेयमात्रविशेषत्वात्सर्वार्था भवन्ति। तथा देशः कर्तारश्च। तस्मात्तंत्रं सौमीही

नांपुनः पृथक्पृथक्स्वफले विनियुक्तानां पृथगेव कर्त्तव्यतावगमो नानाविधिविधेयत्वात् तेन नैरन्तर्यानपेक्षैरेव यद्रक्षा
पशुनेत्यादिकालः संबंध्यत इति नास्ति तंत्रत्वं। यदि पुनः कश्चिद्विनाफलं सौर्यफलं च युगपदिच्छन् कर्म्मद्वयमपि सहवि
कीर्षति किमसौ तंत्रेतो कस्मिन्नेव काले द्वयमपि प्रयुंजीत नेति ब्रूमः। यद्या हि विधिवेलायां साहित्यं नावगतं तदानुष्ठानद
शायामपि न लब्धुं शक्यं। तस्मादेकेन हि विधिना यावत्संगप्रधानानि विधीयंते तावद्दर्यीवाकालो व्याप्य तेनावस्थविक्षि
प्तः समस्तांगप्रधानप्रयोगः कर्त्तव्य इत्यवगमात् सहप्रयोगे वत्तद्विरोधात्। एकेन तु विधिना फले सह चोदितानामाग्नेया
दीनामेकोपक्रमोपसंहारत्वात्तादृशैः संबध्यमानादेशादयोऽनन्यमानविशेषणतया विधिवेलायामेव सर्वसंबंधितया
अवगतास्तंत्रं भवंतीति विशेषः। यद्यप्येवं प्रयोगवाक्यशेषत्वं कालादीनां तदंगानामपि तत्कालत्वं सिध्यति। तथाहि
साध्यसाधनांशयुक्तावगता भावना कथमितीत्थंभावमपेक्षते भावनागतश्चानूपविशेष इत्थंभावः। प्रधानतद्रूपा च भावना
कालादीनपेक्षते। तेन प्रकारापेक्षायां भावनायां तत्प्रकारत्वेन प्रयाजादिष्ववगतेषु सामस्त्यरूपेण भावनाख्यव्यापा

श्रा॰ रेप्रयोगापरपर्यायेवगतेनच्छेषत्वेनकालादयोविधीयंते इत्यंगानामपितएवदेशादयोभवंति। द्रव्यदेवतंपुनर्न्नसम
८ स्तप्रयोगसंबंधित्वेनविधीयते। अनपेक्षितत्वात्अप्रयोगत्वाच्चनसमग्नत्वाधानवहिस्तरंगताघनुरक्तस्यप्रयोगस्यद्रव्यदे
वतापेक्षा। नापितन्निष्पत्तौद्रव्यदेवतंसमर्थंकिंतुफलभावनावयवयागरूपनिष्पादनेनद्रव्यदेवतमपेक्षितत्वात्प्रयो
ग्यत्वाच्चसंबध्यते। तस्मान्नप्रधानसंबंधिद्रव्यदेवतमंगानांभवति। कालादयस्त्वाग्नेयादिकरणिकयाफलभावनयास
मग्ररूपयासंबध्यमानास्तदंगतानामपिभवंतीतिविशेषः॥ ॥इष्टिराजसूयचातुर्मास्येष्वेककर्म्यादिंगानांतंत्रभा
वःस्यात्। दर्शपूर्णमासयोर्विभज्यपवर्ग्येप्रयुज्यमानयोरंगानितंत्रेणनमन्तित्रिकर्मावर्त्तेरन्नितिसंदेहे। तंत्रमित्याहकु
स्मादेककर्मत्वात्। षट्स्वप्येकोपक्रमावसानत्वात्। तेनयदेवकिंचिदंगमनुष्ठितंतदेवषट्सुविकीर्षितेषुक्रियमाणे
प्रगत्स्यमाणविशेषत्वात्तंत्रंभवति। वचनात्वेकोपिप्रयोगोविप्रकृष्यते। नतावतांगानामावृत्तिः। पशुवत्। यथापशुप्रयो
गेवपयाप्रातःसवनेचरंतिपुरोडाशेनमाध्यंदिनेऽङ्गैःस्तृतीयसवनइतिविप्रकृष्यमाणोपिनांगानामावृत्तिःतथेहापी ८

तिमाशंके ब्रूमः। त्रिकद्वयस्य सांगस्य चोदनाकालयोर्द्वयोः। तेनांगानामिहावृत्तिर्वपादीनां पशौ पुनः प्रयघथेक फलत्वादेक
प्रयोगत्वं यस्मात्प्राप्तं तथापि वाचनिकेन कालभेदेन प्रयोगभेदो भवति। पौर्णमास्यां पौर्णमास्या यजेतेत्यनेन हि यः पौर्ण
मासीकरणकः फलार्थो व्यापारः प्रत्ययवाच्यस्तदंगत्वेन पौर्णमासीकालो विधीयते। न पौर्णमासीयागमात्रे। तेनांगानामपि
यागकरणकफलक्रियान्तर्गतानां तत्कालता विहिता भवति। तथामावास्यायामपि सांगे वाऽऽस्या विधीयत इति द्वयोः कालभावा
योरंगानामावृत्तिः। पशौ पुनर्वपाप्रचारादिमात्रस्य भिन्नकालचोदना न पशुयागस्य। न च प्रचारार्थान्यंगानि विहितानि ते
न तत्र नावर्त्तन्ते। अत्र पुनः प्रधानकालभेदेनांगानामावृत्तिः। एवं चातुर्मास्येष्वराजसूयेष्वपि द्रष्टव्यं॥ ॥तथास्या ध्वरकल्पा
यां विशेषस्यैककालत्वात्॥ ॥अध्वरकल्पानामेष्टिः आग्नावैष्णवमष्टाकपालं निर्वपेत्पूर्वाह्णे सरस्वतीमाज्यस्य यजेत
बार्हस्पत्यश्चरुः। आग्नावैष्णवमेकादशकपालं निर्वपेन्मध्यंदिने सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुः। आग्नावैष्णवं द्वा
दशकपालं निर्वपेदपराह्णे सरस्वतीमाज्यस्य यजेत बार्हस्पत्यश्चरुरिति। तत्र श्रूयते पुरा वाचः प्रवदितोर्निर्वपेदिति। तत्र

श्रा. किमंगानि तंत्र। उत तत्र याणाम यि त्रिकाणामर्थेन न्निरंगान्यावर्त्त्य नीयानीति। तदर्थमिदं चिंत्यते। पुरावाचः प्रवदितो निर्वप
९ दिति किं सर्वनिर्वापस्यापकर्षः उत प्रातःकालीनस्यैवेति। प्रकरणाविशेषात् सर्वनिर्वापापकर्षः। न तच्च तदादिवाभिसंबंधा
दिति न्यायान्निर्वापांसस्याग्न्यन्वाधानादेरंगकांडस्यापकर्षः। तच्चांगकांडं वचनादन्यकालमेव प्रधानानामुपकारकमिष्य
1 माणविशेषत्वात्तंत्रं। अतश्च न वापि यागास्तंत्रेणोपक्रांता भवंति। यथोपक्रमं च समापनमित्युत्तरेषामर्थं गानां तं
त्रं। स्यादेवं यदि निर्वापः सर्वेषामपकृष्येत। प्रातःकालिकमात्रस्य तु हि शेषोन्नचोद्यते। प्रातःकालविशेषायं पुरावाच
इति विधीयते। तेन यस्य सामान्यतः प्राप्तिस्तस्यैवायं विधीयते नान्यकालस्य। प्रधानकालत्वं चैवमंगानां चोदकप्राप्तेन वा
धितं भवति। तस्मान्मध्यंदिनापराह्णकालानां यागानामंगकांडं नापकृष्यत इति न सर्वेषां सहोपक्रमः। तस्मादुप्रातर्म
ध्यंदिनापराह्णवर्तिनां प्रधानानामंगान्यपि तत्र तत्रावर्त्तनीयानीति तंत्रभेदः॥ ॥वसाहोमस्तंत्रमेकदेवतेषु स्या
त्प्रदानस्यैककालत्वात्। अग्नीषोमीययज्ञौ याज्याई चांते वसाहोमं जुहोतीति श्रुतो वसाहोमस्योदकपरंपरया प्राजापत्ये ९

श्र९ षुपं प्रातः तंत्रमावापो वेति संदेहे। सहश्रपणाद्वसाया एकत्वाद्धि करेवनत्वाच्च याज्याद्वीनस्यैकत्वात् तंत्रं। सकृत्कर्तव्यमिति
स्पष्टमेव शिष्यहितार्थमेवमुक्तं॥ ॥कालभेदान्नत्वाद्वन्निर्दिष्टवता भेदे। भिन्नदैवतेष्वपि पशुषु सहश्रपणश्रवतो नवसायाः त
कृत्वा याज्याद्वीन भेदे पियस्य कस्य विधा याज्याद्वीनेस्सकृदेव वसाहोमः स्यात्। मैवं। सर्वे हि यशवाः स्वयाज्याद्वीनेस्स
स्या वसायाहोमेन प्रतिपत्तिमपेक्षन्ते। भवति च वसाद्रव्यं तेन सर्वेषु याज्याद्वीनेषु भेदे नवसाहोमः सर्वपशुवसाप्रतिष
त न्नयेकर्तव्यः॥ ॥अंते पूपाहुतिः पूर्ववत्। अग्नीषोमीयपशोः पूपस्यान्तिके अग्निं मथित्वा पूपाहुतिं जुहोतीति पूपाहुतिः पूपे
कादशिन्यां भेदे न कर्तव्या। तंत्रे तोति संदेहे। तदन्तिकदेशानां भेदाद्वसाहोमवदावृत्तिः। मैवं। आपेक्षिकं ह्यन्तिकदेशं मंथनं भ
वति। तेन यद्देशं प्राप्तस्य पशोः समीपं प्राप्तोस्मीति मन्यते यत्र पयोहि ष्टिप भमाय घृतेनत्रमंथनं होमश्च। स च सर्वेषामेकदेशः सं
भवतीति सगत्स्य माला विशेषत्वात् तंत्रं॥ ॥अवभृथे प्रधानेग्निविकारः स्यान्नहि तद्धेतुरग्निसंयोगः॥ ॥अप्स्ववभृथेन चरंतीति
किं प्रधानमात्रमप्सु कर्तव्यं। उताङ्गान्यपीति संशये। मुख्यार्थो वांगस्यावोदितत्वादित्येनेन न्यायेन वैकृतविशेषाणां केवलं प्रधाना

पृ० र्थत्वादुपांशुत्ववदापो पि प्रधानस्यैवाङ्गानां त्वाहवनीय एव क्रियेतिप्राप्ते ब्रूमः। नाउपांशुकर्त्तव्यादिति प्रधानक्रियायां वि
१० हितमुपांशुत्वं युक्तं यदङ्गेषु न भवति। देशस्त्ववभृथकरणिकायां क्रियायां श्रूयमाणस्तदङ्गतानानामङ्गानां भवति। तस्माद
ग प्रधानानामेकदेशत्वं॥ ॥इन्द्रिणैव रुणप्रघासेषु देशभेदात्सर्वतन्त्रं विक्रियेत। वरुणप्रघासेषु विहारद्वयं द्वयोरप्या वेदि॰
10 हवनीयो विभज्य स्थापितः। तत्र श्रूयते अध्वर्युरुत्तरे विहारे हवींष्यासादयति मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मि
न्निति। तत्र विचार्यते किं नवानामपि हविषां तन्त्रमङ्गान्युताग्नेयादीनामष्टानां मारुत्याश्चामिक्षाया भेदेनाङ्गानि कर्त्तव्यानी
ति। तत्र प्राप्तं विवरुणप्रघासैर्यजेतेति प्रयोगवचनैकत्वात्तन्त्रत्वं। न च देशभेदाद्भेदः। आसादनमात्रं दक्षिणे विहारे
मारुत्या विधीयते। न होमस्तस्मात्प्रधानदेशभेदात्तन्त्रमङ्गानि॥ मैवं। न ह्यत्रासादनमपूर्वं विधीयते। किंतु नवानामपि हवि
षां चोदकप्राप्तमासादनं होमस्य विहारद्वयेप्यव्यवस्थया प्राप्तमुभयत्राहवनीयस्य स्थापितत्वात्। आसादनं नियम्यते वाक्यद्
येन। यथा प्राप्तस्य च नियमः। प्राप्ति श्रु होमार्थत्वे यतिताद्दृशस्यैव दक्षिणे विहारे विधानाद्धोमोपि दक्षिणस्मिन्नेवमारु १०

सा॥ तस्मात्प्रधानदेशभेदादङ्गसमानविशेषाणामङ्गानि न तन्त्रं भवन्ति। तसं न तन्त्रमङ्गानि देशभेदात्त्वापि तु। न पृथक्त्वाद
नुष्ठानं प्रसंगात्कार्यसिद्धिः। ननु कर्तृदेशभेदे कथं प्रसंगः। वक्ष्यमाणस्योत्तरं। अर्थस्याविकृतत्वादिति। तदिहार्थो विकृतः
।तथाहि सर्वाणि तावदङ्गानि प्रधानानि चाध्वर्युकर्तृकाणि प्रतिप्रस्थातृकर्तृकाणि चोत्तरवैहारिकाणि दक्षिणवैहारिकाणि
च यजमानात्मसंस्कारापूर्वाण्यादधति। तन्न स्वोत्तरवैहारिकप्रधानोद्देशेनोत्तरस्मिन् विहारेऽध्वर्युणाकृतैरङ्गैर्यजमानात्म
नि स्वापूर्वेषु हितेषु पुनर्हेतुकार्यसमवायफलस्य सामर्थ्याद्धोमाहुतीयागो समपूर्वैर्दक्षिणवैहारिकमपि प्रतिप्रस्थातृकर्तृकम
पि स्वकार्यं जनयतीति कृतमस्याङ्गैः पृथगनुष्ठितैः। अत्रोच्यते। तन्त्रेऽप्यस्य समारब्धे यत्राऽस्य विधिः कृतः। तत्र प्रसंगो न त्वत्र न्य ४
युगपत्सर्वचोदनानां। यत्र हि प्रधानेष्वाधमानेष्वङ्गानि प्रक्रान्तानि परिसमाप्तान्यालोच्यन्ते तत्र लाघवात्सप्रयोगविधिरेव गुण
कालाघवस्याभावं कार्यपरतयाऽनादृत्य स्वस्य शरीयमेव तन्त्रमुपजीवन्स्वीयं तन्त्रं प्रसूते। इह पुनर्नवानामपि यागानां युगप
च्चोदितानां युगपदुपक्रमो वसानं च। तेन सर्वेऽपि तेऽन्योन्यानपेक्षाः स्वाङ्गान्यात्मसमानदेशकालकर्तृकानि प्रयुञ्जते। तेन माहु।

श्रा. स्याः स्वांगेषु दक्षिणे विहारे प्रतिप्रस्थात्रा कर्त्तव्यानीति गम्यमानेषु कथं नन्दनादरेणान्योपजीवनं। तदुपजीवने हि यदस्य स्वांगैः
११ समानदेशकर्तृकत्वं चोदनावगतं तन्न स्याद्दोपेन वैगुण्यापादाभिः स्यायागो न फलायालं। तस्मादुभयत्रांगानामावृत्तिः॥ ॥कर्तृभे
दस्तु पक्षे निवेनूः॥ कर्तृभिदानीतं त्वावायो विंसेते। तत्राध्वर्युप्रतिप्रस्थात्रोरेव वचनादेव विहारद्वयेप्यवस्थितौ तौ ब्रह्माहोतामी
ध्रश्च किं विहारयोर्भेदेनोतनंत्रमिति। तत्र देशभेदेन प्रयोगयोर्भिन्नत्वात्प्रयोगांगभूतानां कर्तॄणामपि भेदः स्यात्॥ मैवं॥
असत्यपि भेदे तैरेवोभयत्रापि कार्यसिद्धेः॥ दर्शिनाचकार्यसिद्धिर्भीष्मवचनाच्च चातुर्मास्यानां पंचर्त्विज इति। विहारद्वया
भिप्रायं चैवहीदं पंचर्त्विकूवचनं। न ह्येकैकस्मिन्विहारे पंचपंवसन्ति। वचनादेवाध्वर्युप्रतिप्रस्थात्रोर्विहारद्वयेव्यवस्थितत्वा
त्। तस्मात्तंत्रत्वं ब्रह्मादयः॥ एकाग्निवादपरेषु तंत्रं स्यात्। येपुनरापराग्निकाः पत्नीसंयाजादयः तेषु तंत्रभावापोवेति संदेहे पौ
र्वाग्निकवद्देशभेदाभावात्तंत्रत्वं। असत्यपि देशभेदे कर्तृभेदाद्भेदः। प्रतिप्रस्थात्रकृताहिमा[illegible] साउपकुर्वन्ति अध्वर्युकृतास्त्विन
रेषां। तस्माद्भेदः। पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यपवत्तस्माद्धृसमाप्तिचोदनादृष्टयत्कंस्या ११

न्॥ ॥वाजपेये प्राजापत्यान्पशूनुपाकृत्य पर्यग्निकृतानुत्सृजति ब्रह्मसाम्न्यालभत इति किमुत्सृजतीति कर्म्मशेषप्र
तिषेधः आलभत इति कर्म्मान्तरविधिः उतोत्सृजतीत्यनुवादः आलभत इत्युत्कर्षविधिः। तत्र नापर्यग्निकृतानारण्याननुत्सृ
जतीति वत्तदन्ताङ्गरीतिविधानात्तथैव प्राजापत्यानां नैराकांक्ष्यान्नवोदके नाङ्गान्तरग्रहणं। अतः पर्यग्निकरणान्ताः प्राजापत्याः
ब्रह्मसाम्न्यालभत इत्यानेन शेषमिति तद्वत्कर्म्मान्तरमिति मन्वानस्यान्तरं। नान्यकर्म्मविधिर्युक्तो नेकादृष्टप्रकल्पनात्। वाक्य
भेदप्रसंगाच्च तस्मादुत्कर्षचोदना। पर्यग्निकरणान्तत्तत्र या तस्यालंभस्य ब्रह्मसामकाल उत्कर्षमात्रं विधीयते। नहि धोचप्राप्तः प
र्यग्निकरणं तथापारोपरम इति तदनुआदमात्रमुत्सृजतिः। एवमसंनत्वाप्यवत्साभान्नकर्म्मान्तरवाक्यभेदादुपगमो युक्तः। त
स्मात्पर्यग्निकरणान्तमङ्गकाण्डं समुद्दिश्य क[illegible] कर्त्तव्यं। न माध्यंदिने पुनरावर्त्तनीयं पशवश्च नान्ये उपाहर्त्तव्याः॥ ॥पंचशा
रदीयास्तथेति चेन्न॥ अस्ति पंचशारदीयो नाम अहीनः पंचाहः। तत्र प्रथमेऽहनि वैशाख्याममावास्यायां सप्तदश मारुतीस्त्रिवत्सा अप्रनीताः
उपाकरोति सप्तदश पृश्नीरनुत्सृष्टास्ताः पर्यग्निकृतान्प्रोक्षितानाद्यन्तरा आलभते येन तानुत्सृजति। ततः संवत्सरेण जिवा

श्रा. आनयंतितानां अथैवोत्सृष्टास्तान्पर्यग्निकृतानित्यादि पूर्ववत्। एवं तृतीये चतुर्थे च संवत्सरे स्त्रीयपशुयागानां सामस्त्येनानुष्ठानमुत्सृष्टानां
१२ च पर्यग्निकृतानामुत्सर्गमुत्क्रान्तत्रयश्रूयते। पंचमे वर्षे त्रीन्हित्वैतेनानुत्सृष्टांस्त्रीन्स्त्रीनन्वहमालभते। पंचोत्तमे ह्नीति। तत्रोत्सृष्टु
संशयः। किं यएव प्रथमे संवत्सरे पर्यग्निकृता उत्सृष्टा उत्सृष्टाः तेषामेव द्वितीयादिषु संवत्सरेषु पर्यग्निकरणं पंचमे वत्सरे ते
षामेव पंचसु सुत्सृष्टेषु त्रीस्त्रीनित्येव मालंभः प्राजापत्यानामिव। उत प्रथमे वर्षे उपक्रांतानां पर्यग्निकरणानां गरीनिविधाने
ननत्रैव समातिरारणपवत् द्वितीयादिष्वन्येन्ये उत्सृष्टाः पंचमे वर्षे तु सर्वेष्वन्येषामुत्सृष्टानामालंभ इति। तत्र त्रीस्त्रीनित्यनेनब्र
ह्मसामासं भवात्सर्वेषामेवालंभोत्कर्षमात्रविधौ लाघवं। वचनान्तरस्य पर्यग्निकृतानामपि तेषां पुनःपुनः पर्यग्निकरणं क्रियते उत्स
र्गवचनानि वालंभोत्कर्षादेव प्राप्तस्यार्थस्यानुवाद इति प्राप्ते ब्रूमः॥ ॥स्यादेवं यदि त्रीस्त्रीनित्यमेनालंभोत्कर्षः शक्यो विधा
तुं न त्वेवमस्ति। गुणवाक्यत्वे सति त्रीस्त्रीनन्वहमिति वानेकार्थविधाने वाक्यभेदापत्तेः। तथा पंचेति चोत्तमे हनीति वार्थभेदो
मीविधादर्शयितव्यः। तस्मादिदं तावत्संख्याकालविशिष्टापूर्वं धात्विकं न मत्वं वा विहिते सत्यालंभोत्कर्षे प्राजापत्यन्यायासंभवा १२

तदंतागरीति विधानेनारण्यन्यायेन प्रथमवर्षोपक्रान्तानामुक्तयागानां त्रिवत्सानामिव तत्रैव समाप्तिः। द्वितीयादिष्वपि वर्षे
षुअन्यएवस्त्रीपशुयागाः पुंपशुयागाश्च। एवं प्रतिसंवत्सरं देवतानुषंगेण चतुस्त्रिंशत्कर्माणि पंचमेवान्येषामेवोक्तानामा
लंभः॥ दशपेये क्रयप्रतिकर्षो नततःप्राचांनस्मात्समानंतंतंस्यात्। राजसूयेभिषेचनीयो नाम सोमयागः ततः संसृपांहवींषि
ततः पुनर्दशपेयः सोमयागः तावि माव भिषेचनीयदशपेययोः समानतंत्रौ भिन्नतंत्रौ वेति संदेहे सह सोमंक्रीणस्यभिषेचनी
यस्य दशपेयस्य वेति वचनादभिषेचनीयसोमक्रयकाले दशपेयक्रयः प्रतिकृष्यते सर्वप्रतिकृष्यमाणः प्राचोऽपि पदा
र्थान्प्रतिकर्षति तदंतमपकर्षेस्यादिति न्यायात्। तस्मात्सहोपक्रमितत्वादभिषेचनीयदशपेययोर्यथोपक्रमं च समापयित
व्याविति समानतंत्रौ। नैवं। उपसंवादवादमात्रमत्र क्रीणातिनोच्यते। न च तं गमनं ऋयः। न तत्सौ क्रीणाते नैसुक्योवाच्यः स
त्यं हि दत्वा परकीयस्य स्वीकरणं क्रयः। न चोपसंका दस्येवं रूपत्वमस्तिपयष्येवं न थापि गोण्याद्दसा नसैवेदं साहि समुच्यते
वचनांतरानुगुण्याद्दशपेयेहि श्रूयते सयोदी सपतिसघः सोमंक्रीणातिनपा अभिषेचनीयेऽप्यव भ यदर्शनं मसंतानु

सा. पपन्नमेकतन्त्रत्वे स्यात्। तस्मादंगभूतक्रयापकर्षाभावान्न तदङ्गापकर्ष इति न सहोपक्रमत्वं। कालभेदात्तु भिन्नोपक्र
१२ मावसानौ भिन्नौ भिन्नतन्त्रावेवैतौ निष्कासस्यावभृथेन तदेकदेशत्वासंभवस्तदानविप्रकर्षः स्यात्॥ ॥वरुणप्रघासेषु
वारुण्यामिक्षामारुत्यामिक्षे निष्कृतं। तत्र पुनः श्रूयते। वारुण्या निष्कासेन तुषैश्चावभृथं यन्तीति तत्र संशयः। किं प्र
13 धानस्यामिक्षायागस्यायं प्रचारविप्रकर्षः। यथोरिव वपाहृदयादिभिः प्रातःसवनतृतीयसवनयोः। उत निष्कासस्ये
यं प्रतिपत्तिः। यथामिक्षानिष्कास इत्यवभृथधर्मकं कर्मान्तरं विधीयत इति। तत्र मुख्यस्यामिक्षाइज्यस्य प्रकृतयाग
देव शेषत्वात्तदेकदेशेन तस्याप्येवं तायैव रुणायदीयमानेन कर्मान्तरं युक्तमवभृथशब्दस्तु देवतासामान्याद्गौणोऽनुवादः। अवभृ
केकर्म थोऽपि हि वारुणः। न चानुवादे गौणत्वं दोषः सिद्धान्तेऽनु तद्धर्मविधौ विधावेव गौणत्वस्यान्याय्युक्तं। तस्मात्तस्यैवायमभ्या
स इति तस्मिन्निष्कृष्टाद्देः पुनः करणं। नैवं। अवभृथशब्दानर्थक्यात्। न चार्थवत्त्वे संभवत्यानर्थक्यं युक्तं तस्मादवभृथधर्मक
कर्मान्तरविधानं न तु प्रयाजशेषाभिघारणवदामिक्षाशेषस्य प्रतिपत्त्यर्थं। सत्यं कर्मान्तरं न तु प्रतिपत्तिः। अवभृथशब्दवि १२

हृ रोधान्न्याय्यं वभृथे हि द्रव्यं गुणानः कर्म्म प्रधानतः ऍतुविपर्ययात्तद्भावानुपपत्तिः। तेन यस्यैवावभृथशब्दस्य प्रसंगात्कर्म्मोदा
न्तरमाश्रितं तेनैव प्रतिपन्नस्यार्थतानिराकरणेनार्थकर्म्म नास्ति ध्वनिवचनाद्वाम्यरीयस्यापि द्रव्यस्यैकदेशोन्मन्त्रविनियुज्यमा
नोनरुध्यति॥ ॥उदयनीयेवन्तद्धत्॥ ज्योतिष्टोमे प्रायणीयश्चरुरुदयनीयश्च तत्र श्रूयते प्रायणीयस्य निष्कासे उदयनीयम
नुनिर्वपतीति तत्र संशयः किं प्रायणीयनिष्कासद्रव्यकमुदयनीयधर्म्मकं कर्म्मान्तरं विधीयते किं वा प्रायणीयनिष्कासस्योदय
नीयं निर्वापसंयोगः प्रायणीयनिष्कासे निर्वाप उदयनीयस्य संस्कार इति पूर्व्ववत्तद्धर्म्मकं कर्म्मविधिः मुख्यस्यैवोदयनी
ककर्म स्य हप्रकृतत्वात्प्रकरणान्तरन्यायेन तद्धर्म्मविधिः तस्मात्प्रायणीयनिष्कासस्य कृतार्थस्येयं प्रतिपत्तिः उदयनीयनिर्वापसंयो
गः नैतदेवं निष्कासस्य हि सम्प्रत्यागुणभावोवगम्यते। द्वितीयया प्रधानत्वमितरस्य स्फुटं श्रूयते। उदयनीयहविश्च निरुप्यमानं भा
व्युपयोगित्वात्संस्कारार्हं। न च निष्का[illegible]जशेषव उदयनीयसंयोगात् किंचिद्दृष्टमस्ति तस्माच्छ्रुत्यानुगुण्यादुदय
नीयहविः संस्कारार्थम्प्रायणीयनिष्कासे निर्वापः॥ ॥इति शास्त्रदीपिकायामेकादशस्य द्वितीयः पादः॥ ॥अंगानां मुख्यका

श्रा. त्वाद्वचनारम्भकालत्वं। प्रधानसमये देशत्वं प्रधानकालत्वं चांगानामुक्तं यत्र त्वाहत्सांगस्य भिन्नदेशकालत्वं वचनेनैवोक्तं तत्र
१४ तथा भवतीति सुहृद्भूत्वोक्तवान् नाङ्गनिराकार्यमस्ति॥ ॥इत्यस्या कर्म्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् सकालत्वात्॥ संव
नेष्वालम्भणोग्नीनारभ्याधीतेष्वनारभ्याधीतमप्याधानमग्निहोत्रादीनामंगमितिकृत्वा विंस्मते। किमंगं सदाधानं प्रतिकर्म्मप्रतिप्र
योगं भेदेन कर्त्तव्यमुत सर्वकर्म्मणां सर्वप्रयोगानां च तन्त्रेणेति॥ ॥तत्र। प्रयाजादिवदंगत्वाद्वावृत्तिः स्यात्प्रतिक्रियं। आनन्तर्यो
द्विशेषश्चागत्स्य तेनोनन्तंत्रता। स्वकालत्वाद्वनं तन्त्रत्वं विशेषाग्रहणाद्भवेत्॥ आनन्तर्याद्विशेषश्चेत्वाधानसमये स्य सौ। तदीरकर्म्म
णः प्रारंभे मध्येवाप्यपुनर्नवेयेन नद्दपवर्गे अपवृज्ये नवाचनिकोस्यस्य वसंनादिः स्वकालः। तेन तन्त्रेवस्थितं सर्वेषामुप
करोतीस गत्स्यमाण विशेषत्वात्तंत्रंयदाधाने कृतेनन्तरं किंचित्कर्म्मायतनतिनदर्थमित्यानन्तर्येण विशेषाग्रहणेदतिवेत्॥ ना
यमाधानसमयेस्ति विशेषः। तदाप्येवमभिसंधायासावाधत्ते यदेवं किंचिन्निमित्तवशात्कामवशाद्वा कर्त्तव्यं कर्म्मोपस्थास्यते तद
र्थमाधास्येग्नीनिति न तु कंचिदेव कर्म्मविशेषमभिसंधायाधत्ते। एवमनभिसंहितकर्म्मविशेषेण सर्वोद्देशेनाधाने कृतेप्यपि १४

किंचित्कारणवशात्प्रथमं कर्म्मोत्पत्तिनियापि नतादर्थ्यमेव भवति प्रथमावस्थायामेव सर्व्वार्थत्वावधारणात्तस्मात्तन्त्रं॥।॥
यूपश्चाकर्म्मकालत्वात्॥ ॥ज्योतिष्टोमे अग्नीषोमीयपशौ उपदिष्टो यूपः सवनीयानुबंध्ययोस्त्वतिदिष्टः स किं त्रयाणामपि य
शूनां तन्त्रं उत प्रतिपशु भेदेन यूप इति॥ तदर्थमिदं विचार्यते। दीक्षासु यूपं छिनत्तीति किमग्नीषोमीययूपस्यापकर्षः उ
त सर्व्वयूपानामिति। तत्र।यथैवाध्वरकल्पायामाद्यस्यैवापकर्षणं॥ निर्वापस्य तथाद्य यूपोप्याद्य एवापकृष्यते। अग्नीषोमी
यसंस्थायामतो सावपकृष्यते। भेदेन सवनीयादेस्तु काले यूपसंग्रहः॥ नैतदस्य विशेषेण सर्व्वयूपापकर्षणात्। नन्वेहाध्वर
कल्पावद्युक्तमाद्यापकर्षणं। प्रधानकालबाधो न तथैवाप्रसक्तचोदना। आद्यापकर्षणेप्यस्ति तस्मात्सर्वापकर्षणं। अध्वरकल्पा
यां हि प्रथमनिर्वापापकर्षे सति प्रधानकालबाधो नियमविधानं च लभ्यत इति स्यैवापकर्षः समाश्रितः। अत्र त्वग्नीषोमीय
यूपापकर्षेप्यस्ति प्रधानकालबाधो माप्तविधिश्चातस्मादविशेषाद्यूपापकर्षे सर्वकर्म्मकालत्वादग्रस्य मानाविशेषायूपः
सर्वेषां तन्त्रं॥ संस्कारास्त्वावर्त्तेरन्नर्थकालत्वात्। यूपस्य तन्त्रत्वेन संस्काराणां तक्षणजोषणादीनां तन्त्रत्वमापन्नमित्येवं निसंदेहे छेद

श्रा. नमात्रस्यापकर्षविधानाज्ज्योषणादीनां चाग्नीषोमीयकालानां तदपवर्गे पवर्गास्तवनीयादौ पुनःप्रयोग इति प्राप्ते ब्रूमः। नैषा
१५ मप्यपकर्षः। दीक्षाणु यूपं छिनत्तीति नायमर्थः यूपं संतं छिनत्तीति यूपस्य प्रागसिद्धत्वात्। किं तर्हि छेदनेन यूपं कुर्यादिति नव
छेदनमात्रेणासौ कर्तुं शक्यते न ह्याज्यादीनामपि यूपत्वे पक्षिनत्वात् तस्माच्छेदनगहनमुपलक्षणं छेदनादिभिर्यूपं कुर्या
